## अध्यायः- २८ chapter-28

नारद उवाच ।।[१]

इत्युक्त्वा मदिरात्तस्मान्निर्जगाम हिमाद्रिजा ।।
तस्यां व्रजंत्यां चक्रुश्च गणाः किलकिलध्वनिम् ।। १

क्व मातर्गच्छ सीत्युक्त्वा रुदन्तो धाविताः पुरः ।।
विष्टभ्य चरणौ देव्या वीरको बाष्पगद्गदम् ।। २

प्रोवाच मातः किं न्वेतत्क्वयासि कुपिता त्वरा ।।
अहं त्वामनुयास्यामि मातरं स्नेहवत्सलाम् ।। ३

नाहं सहिष्ये पुरुषां गिरीशस्य[२] त्वयोज्झितः ।।
पुत्रः पारुष्यपात्रं हि भवेन्मात्रा विना[३] पितुः ।। ४

उन्नाम्य वदनं माता मा शोकं पुत्र भावय ।। ५

शैलाग्रात्पतितुं नैव न्याय्यं गंतुं मया सह ।।
वक्ष्यामि पुत्र ते योग्यं तत्तु कार्यं त्वया श्रृणु ।। ६

कृष्णेत्युक्ता हरेणाहं निंदिता च तृणायिता ।।
साहं तपः करिष्यामि यथा गौरीत्वमान्पुयाम् ।। ७

---

१ ब. प्रतौ इत्ययं पाठः नास्ति ।
२ ब. गिरि
३ ब. विभा

गौरांगी लंपटो ह्येष्ा यातायां मध्यनंतरम् ।।
द्वाररक्षा त्वया कार्या नित्यं रंध्रान्यवेषिणा ।। ८

यथा न काचित्प्रविशेद्योषिदत्र हरांतिके ।।
दृष्ट्वा परां स्त्रियं चात्र वदेथा मम पुत्रक ।। ९

शीघ्रमेव करिष्यामि ततो युक्तमनंतरम् ।।
एवमस्त्विपति तां देवीं वीरकः प्राह सांप्रतम् ।। १०

मातुराज्ञा सुतो हलादपालावितांगो गतज्वरः ।।
जगाम्[१] त्र्यक्षं संद्रष्टुं प्रणिपत्य च मातरम् ।। ११

गजवक्त्रं ततः प्राह प्रणाम्य समवस्थितम् ।।
साश्रुकंठं प्रयाचंतं नय मामपि पार्वतीं ।। १२

गजवक्त्रं हि त्वां बाल माम वोपहसिष्यति ।।
तदागच्छ मया सार्धं या गतिर्मे तवापि सा ।। १३

पराभवाद्धि धूर्तानां मरणं साधु पुत्रकः ।।
एवमुक्त्वा समादाय हिमाद्रिं प्रति सा ययौ ।। १४

# २ इति श्री स्कांदे महापुराणे.....पार्वत्यास्तपोर्थंगमनवर्णनं नामाष्टा-
विंशोऽध्यायः ।।

---

१ ब. जगम

# २ ब. इति श्री स्कंद पुराणे कुमारिका खंडे अष्टविंशोऽध्यायः ।।